ततो गर्भरेखाप्रान्तात् पूर्वोक्तपश्चिमरेखाप्रान्तद्वयस्पर्शिसूत्रद्वयं निपात्य नैरृत्यदिशि पूर्वाभिमुखयोनिकं त्रिकोणं कुण्डमुत्पादयेत्। एवञ्च विधीयमाने स्थानत्रये तृतीयांशत्रयवृद्धिस्तत्रैव मत्स्यत्रयमपि निष्पद्यत इति। "कर्म्माङ्गाष्टांशसंन्यासाद्वृत्तं कुण्डमिहोदितम्। कर्म्मसूत्रार्द्धस्य योऽष्टमांशस्तस्य संन्यासात् सम्यक् न्यासात् वृत्तं कुण्डं स्यादिति। अत्रैवं रचनाप्रकारः चतुरस्रे क्षेत्रे कोणात् कोणान्तरगामिनः सूत्रस्यार्द्धं कोणार्द्धशब्दवाच्यमष्टधा विभज्य यावानष्टमो भागस्तावन्तं भागं चतुर्द्दिक्षु बहिर्विन्यसेत्। ततः क्षेत्रगर्भदेशे सूत्रादिं निधाय बहिःस्थिताष्टमभागविन्यस्तं तस्यैव सूत्रस्य प्रान्तं सर्व्वतः परिभ्राम्य पश्चिमदिशि पूर्वाभिमुखयोनिकं वृत्तकुण्डं कुर्य्यात्। "षड्भागवृद्धितो मत्स्यैश्चतुर्भिः स्यात् षडस्रकम्" क्षेत्रपार्श्वयोः प्रत्येकं षष्ठभागवृद्धिं कृत्वा अवशिष्टदिशोर्मत्स्यचतुष्टयमुत्पाद्य सूत्रषट्कपातात् षडस्रकुण्डनिष्पत्तिरिति। अत्रैवं सम्प्रदायः—समचतुरस्रं क्षेत्रं षोढा विभज्य यावान् षष्ठो भागस्तावता मानेन क्षेत्रस्य दक्षिणोत्तरपार्श्वे समन्ताद्वर्द्धयित्वा तदेव क्षेत्रमायतचतुरस्रं सम्पादयेत्। अथानन्तरोक्तपार्श्वद्वयरेखास्पर्शिनीं दक्षिणोत्तरायतां गर्भरेखां रचयेत्। ततः क्षेत्रमध्यादुत्तरपार्श्वरेखामध्याच्च पूर्वोक्तगर्भरेखार्द्धपरिमितमेकैकं सूत्रं निपात्य पूर्वैशानदिशोरन्तराले मत्स्यमुत्पाद्य तेनैव प्रकारेण पश्चिमवायव्ययोरन्तराले मत्स्यं कुर्य्यात्। अथ भूयोऽपि क्षेत्रमध्याद्दक्षिणपार्श्वरेखामध्याच्च प्रागुक्तगर्भरेखाप्रान्तद्वयात् लाञ्छनचतुष्टयस्पर्शिसूत्रचतुष्टयं निपातयेत्। एवं लाञ्छनान्तरालस्थितसूत्रद्वयेन सह सूत्रषट्कयोगाद्वायव्यदिशि प्राङ्मुखयोनिकं षट्कोणकुण्डं कुर्य्यात्। "चतुरस्राष्टभागेन कर्णिका स्याद्विभागशः। तद्बहिस्त्वेकभागेन केसराणि प्रकल्पयेत्। तृतीये दलमध्यानि तुरीये दलकोटयः। भ्रामणात् पद्मदलं स्याद्दलाग्रं दर्शयेद्बहिः"। चतुरस्रस्य अष्टधा विभक्तस्य मध्ये अष्टमभागेन कर्णिका स्यात् कर्णिकाया बहिः परिधिस्थे द्वितीये अष्टमभागे विन्यासे केसराणि स्युः। केसराद्बहिःपरिधिस्थिते तृतीये अष्टमभागे विन्यासे दलमध्यानि कल्पयित्वा चतुर्थे दलकोटीं विधाय चतुरस्राद्बहिर्द्दलाग्राणि दर्शयेत्। अत्राप्यष्टमभागेनेति सम्बध्यते। विभागशः विभागे विभागे सर्व्वदिग्भागेष्वित्यर्थः। भ्रामणात्,-सूत्रस्येति शेषः एतच्च पद्मदलं सर्व्वत्र योजनीयम्।

अयमर्थः—चतुरस्रं क्षेत्रं प्रागग्राभिरुदगग्राभिश्च रेखाभिरष्टधा विभज्य मध्यदेशे लाञ्छयित्वा क्षेत्राद्बहिश्चतुर्द्दिक्षु समन्तादपरमष्टभागं विन्यसेत् सत्येवं लाञ्छनात् परितः प्रतिदिशं पञ्चपञ्चाष्टमभागावधिरेखा भवन्ति। ततः पूर्वोक्तलाञ्छनोपरि विन्यस्तादेस्तत्तद्रेखाविन्यस्तप्रान्तस्य च सूत्रस्य परिभ्रामणात् पञ्च वृत्तानि सम्पाद्य वृत्तातिरिक्तरेखाः परिमार्ज्जयेत्। ततः प्रथमे वृत्ते कर्णिका द्वितीये केसराणि तृतीये दलमध्यानि चतुर्थे दलकोटयः पञ्चमे दलाग्राणीति कृत्वा अष्टदलं पूर्वाभिमुखयोनिकं पद्मकुण्डमुत्तरदिशि कुर्य्यात्। इदानीमेतदेव कुण्डं प्रकारान्तरेणोच्यते "वृत्तकुण्डं समं चाप्यथवान्यप्रकारतः। वृत्तकुण्डं पुरा कृत्वा चतुर्द्धाऽऽमेखलं भजेत्। उत्सेधञ्च तथा कृत्वा कर्णिका सार्द्धका भवेत्। अवशिष्टं दलं वेददलमष्टदलन्तु वा" यथा प्रतीच्यां दिशि वृत्तकुण्डमभिहितमिहापि तथैव कृत्वा तन्मध्ये यथाविभागं पद्मकुण्डं कुर्य्यादिति। अथवेत्यादिना तृतीयः प्रकार उच्यते पूर्व्वं वृत्तकुण्डमेव आमेखलं मेखलमवधीकृत्य अन्तश्चतुर्द्धा भजेत्। वृत्तकुण्डमध्ये अन्यस्यापि समभागस्य वृत्तत्रयस्य करणाच्चतुर्धा क्षेत्रविभागः कार्य्य इत्यर्थः। ततः क्षेत्रमध्ये सार्द्धभागेन विस्तृता कर्णिका विधेया। उत्सेधञ्च तथा कृत्वेति, कर्णिकाया उच्छ्रयमपि सार्द्धभागेन कृत्वेत्यर्थः। अवशिष्टेन सार्द्धभागद्वयेन केसरव्यतिरिक्तानि दलान्येव कुर्य्यात्। एवञ्चतुर्द्दलमष्टदलं वा पद्मकुण्डं कुर्य्यात्। "क्षेत्रात् द्वादशमं भागं चतुर्द्दिक्षु तदन्तरे। विन्यस्य तत्प्रमाणेन तुर्य्यांशमपरं नयेत्। तस्य कर्णप्रमाणेन तद्भुजास्वपि लाञ्छयेत्। तत्राष्टसूत्रसंयोगादष्टास्रं कुण्डमुच्यते"। द्वादशधा विभक्तस्य क्षेत्रस्य यावान् द्वादशो भागस्तावन्तं भागं चतुर्द्दिक्षु विन्यस्य, तदन्तरे, तस्य क्षेत्रस्य अन्तरे बहिःप्रदेशे "अन्तरं बहिर्योगोपसंव्यानयोरिति" ज्ञापकादन्तरशब्दोऽत्र बहिर्वचनः। तत्प्रमाणेनेति तस्य बहिर्विन्यस्तद्वादशभागस्य परिमाणेन अपरं द्वितीयं तुर्य्यांशं चतुरस्रं नयेत् प्रणयेत् कुर्य्यात् इति यावत्। तुर्य्यांशमिति, स्वार्थिकोऽत्र पूरणप्रत्ययः। तस्य कर्णप्रमाणेनेति। कोणात् कोणान्तरस्पर्शिसूत्रं शिल्पशास्त्रेषु कर्ण इति प्रसिद्धम्। इह तु क्षेत्रगर्भादारभ्य चतुष्कोणगामिनः पृथगेव चत्वारः कर्णा इत्यभिप्रायेण कर्णार्द्धमपि कर्णशब्देनोक्तम्। तेनायमर्थः। बाह्यस्थितचतुर-